**धीमहि गायत्रीं**
**राग :भौळि**
**ताळ : आदि**

**पल्लवि :**
**धीमहि गायत्रीं**
**सततं -धीमहि गायत्रीं**

**चरणः**

१. संध्यात्रितये मुनिविनुतां
सवितृ वरेण्य श्रीरूपां
धीमद्धी चोदन शीलां
भर्गो रूपां तां देवीं

२. महित चतुर्विंशतिवर्णां
त्रिपदां देवीं षट्कुक्षिं
पंचशिरस्कां दशहस्तां
उपनयनार्थे विनियुक्तां

३. मुक्ता विद्रुम हेमघना
घन धवळोज्वल वर्ण मयीं
व्याहृति रूपां प्रणवार्थां
गायक सच्चिदानंद करां